# Shri Krishna Stotra Shri Mahadevakrita

# શ્રીકૃષ્ણસ્તોત્રમ્ શ્રીમહાદેવકૃતમ્

## Document Information

Text title : mahAdevakRitaM shrIkRiShNastotra brahmavaivartapurANe

File name : krishnastotramahAdevaBVP.itx

Category : vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Transliterated by : NA

Proofread by : NA

Description-comments : brahmavaivartapurANa gaNapatikhaNDam adhyAya 32 shloka 27-76

Latest update : April 4, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 4, 2020

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તોત્રમ્ શ્રીમહાદેવકૃતમ્

શ્રીમહાદેવ ઉવાચ -
પરં બ્રહ્મ પરં ધામ પરં જ્યોતિઃ સનાતનમ્ ।
નિર્લિપ્તં પરમાત્માનં નમામ્યખિલકારણમ્ ॥ ૧॥

સ્થૂલાત્સ્થૂલતમં દેવં સૂક્ષ્માત્સૂક્ષ્મતમં પરમ્ ।
સર્વદૃશ્યમદૃશ્યં ચ સ્વેચ્છાચારં નમામ્યહમ્ ॥ ૨॥

સાકારં ચ નિરાકારં સગુણં નિર્ગુણં પ્રભુમ્ ।
સર્વાધારં ચ સર્વં ચ સ્વેચ્છારૂપં નમામ્યહમ્ ॥ ૩॥

અતીવ કમનીયં ચ રૂપં નિરુપમં વિભુમ્ ।
કરાલરૂપમત્યન્તં બિભ્રતં પ્રણમામ્યહમ્ ॥ ૪॥

કર્મણઃ કર્મરૂપં તં સાક્ષિણં સર્વકર્મણઃ ।
ફલં ચ ફલદાતારં સર્વરૂપં નમામ્યહમ્ ॥ ૫॥

સ્રષ્ટા પાતા ચ સંહર્તા કલયા મૂર્તિભેદતઃ ।
નાનામૂર્તિઃ કલાંશેન યઃ પુમાંસ્તં નમામ્યહમ્ ॥ ૬॥

સ્વયં પ્રકૃતિરૂપશ્ચ માયયા ચ સ્વયં પુમાન્ ।
તયોઃ પરં સ્વયં શશ્વત્તન્નમામિ પરાત્પરમ્ ॥ ૭॥

સ્ત્રીપુન્નપુંસકં રૂપં યો બિભર્તિ સ્વમાયયા ।
સ્વયં માયા સ્વયં માયી યો દેવસ્તં નમામ્યહમ્ ॥ ૮॥

તારકં સર્વદુઃખાનાં સર્વકારણકારણમ્ ।
ધારકં સર્વવિશ્વાનાં સર્વબીજં નમામ્યહમ્ ॥ ૯॥

તેજસ્વિનાં રવિર્યો હિ સર્વજાતિષુ વાડવઃ ।
નક્ષત્રાણાં ચ યશ્ચન્દ્રસ્તં નમામિ જગત્પ્રભુમ્ ॥ ૧૦॥

રુદ્રાણાં વૈષ્ણવાનાં ચ જ્ઞાનિનાં યો હિ શઙ્કરઃ ।

નાગાનાં યો હિ શેષશ્ચ તં નમામિ જગત્પતિમ્ ॥ ૧૧॥

પ્રજાપતીનાં યો બ્રહ્મા સિદ્ધાનાં કપિલઃ સ્વયમ્ ।
સનત્કુમારો મુનિષુ તં નમામિ જગદ્ગુરુમ્ ॥ ૧૨॥

દેવાનાં યો હિ વિષ્ણુશ્ચ દેવીનાં પ્રકૃતિઃ સ્વયમ્ ।
સ્વાયમ્ભુવો મનૂનાં યો માનવેષુ વૈષ્ણવઃ ।
નારીણાં શતરૂપા ચ બહુરૂપં નમામ્યહમ્ ॥ ૧૩॥

ઋતૂનાં યો વસન્તશ્ચ માસાનાં માર્ગશીર્ષકઃ ।
એકાદશી તિથીનાં ચ નમામ્યખિલરૂપિણમ્ ॥ ૧૪॥

સાગરઃ સરિતાં યશ્ચ પર્વતાનાં હિમાલયઃ ।
વસુન્ધરા સહિષ્ણૂનાં તં સર્વં પ્રણમામ્યહમ્ ॥ ૧૫॥

પત્રાણાં તુલસીપત્રં દારુરૂપેષુ ચન્દનમ્ ।
વૃક્ષાણાં કલ્પવૃક્ષો યસ્તં નમામિ જગત્પતિમ્ ॥ ૧૬॥

પુષ્પાણાં પારિજાતશ્ચ સસ્યાનાં ધાન્યમેવ ચ ।
અમૃતં ભક્ષ્યવસ્તુનાં નાનારૂપં નમામ્યહમ્ ॥ ૧૭॥

ઐરાવતો ગજેન્દ્રાણાં વૈનતેયશ્ચ પક્ષિણામ્ ।
કામધેનુશ્ચ ધેનૂનાં સર્વરૂપં નમામ્યહમ્ ॥ ૧૮॥

તૈજસાનાં સુવર્ણં ચ ધાન્યાનાં યવ એવ ચ ।
યઃ કેસરી પશૂનાં ચ વરરૂપં નમામ્યહમ્ ॥ ૧૯॥

યક્ષાણાં ચ કુબેરો યો ગ્રહાણાં ચ બૃહસ્પતિઃ ।
દિક્પાલાનાં મહેન્દ્રશ્ચ તં નમામિ પરં વરમ્ ॥ ૨૦॥

વેદસઙ્ઘશ્ચ શાસ્ત્રાણાં પણ્ડિતાનાં સરસ્વતી ।
અક્ષરાણામકારો યસ્તં પ્રધાનં નમામ્યહમ્ ॥ ૨૧॥

મન્ત્રાણાં વિષ્ણુમન્ત્રશ્ચ તીર્થાનાં જાહ્નવી સ્વયમ્ ।
ઇન્દ્રિયાણાં મનો યો હિ સર્વશ્રેષ્ઠં નમામ્યહમ્ ॥ ૨૨॥

સુદર્શનં ચ શસ્ત્રાણાં વ્યાધિનાં વૈષ્ણવો જ્વરઃ ।
તેજસાં બ્રહ્મતેજશ્ચ વરેણ્યં તં નમામ્યહમ્ ॥ ૨૩॥

બલં યો વૈ બલવતાં મનો વૈ શીઘ્રગામિનામ્ ।
કાલઃ કલયતાં યો હિ તં નમામિ વિલક્ષણમ્ ॥ ૨૪॥

જ્ઞાનદાતા ગુરૂણાં ચ માતૃરૂપશ્ચ બન્ધુષુ ।
મિત્રેષુ જન્મદાતા યસ્તં સારં પ્રણમામ્યહમ્ ॥ ૨૫॥

શિલ્પિનાં વિશ્વકર્મા યઃ કામદેવશ્ચ રૂપિણામ્ ।
પતિવ્રતા ચ પત્નીનાં નમસ્યં તં નમામ્યહમ્ ॥ ૨૬॥

પ્રિયેષુ પુત્રરૂપો યો નૃપરૂપો નરેષુ ચ ।
શાલગ્રામશ્ચ યન્ત્રાણાં તં વિશિષ્ટં નમામ્યહમ્ ॥ ૨૭॥

ધર્મઃ કલ્યાણબીજાનાં વેદાનાં સામવેદકઃ ।
ધર્માણાં સત્યરૂપો યો વિશિષ્ટં તં નમામ્યહમ્ ॥ ૨૮॥

જલે શૈત્યસ્વરૂપો યો ગન્ધરૂપશ્ચ ભૂમિષુ ।
શબ્દરૂપશ્ચ ગગને તં પ્રણમ્યં નમામ્યહમ્ ॥ ૨૯॥

ક્રતૂનાં રાજસૂયો યો ગાયત્રી છન્દસાં ચ યઃ ।
ગન્ધર્વાણાં ચિત્રરથસ્તં ગરિષ્ઠં નમામ્યહમ્ ॥ ૩૦॥

ક્ષીરસ્વરૂપો ગવ્યાનાં પવિત્રાણાં ચ પાવકઃ ।
પુણ્યદાનાં ચ યઃ સ્તોત્રં તં નમામિ શુભપ્રદમ્ ॥ ૩૧॥

તૃણાનાં કુશરૂપો યો વ્યાધિરૂપશ્ચ વૈરિણામ્ ।
ગુણાનાં શાન્તરૂપો યશ્ચિત્રરૂપં નમામ્યહમ્ ॥ ૩૨॥

તેજોરૂપો જ્ઞાનરૂપઃ સર્વરૂપશ્ચ યો મહાન્ ।
સર્વાનિર્વચનીયં ચ તં નમામિ સ્વયં વિભુમ્ ॥ ૩૩॥

સર્વાધારેષુ યો વાયુર્યથાઽઽત્મા નિત્યરૂપિણામ્ ।
આકાશો વ્યાપકાનાં યો વ્યાપકં તં નમામ્યહમ્ ॥ ૩૪॥

વેદાનિવર્ચનીયં યન્ન સ્તોતું પણ્ડિતઃ ક્ષમઃ ।
યદનિર્વચનીયં ચ કો વા તત્સ્તોતુમીશ્વરઃ । ૩૫॥

વેદા ન શક્તા યં સ્તોતું જડીભૂતા સરસ્વતી ।
તં ચ વાઙ્મનસાપારં કો વિદ્વાન્સ્તોતુમીશ્વરઃ ॥ ૩૬॥

શુદ્ધતેજસ્સ્વરૂપં ચ ભક્તાઽનુગ્રહવિગ્રહમ્ ।
અતીવ કમનીયં ચ શ્યામરૂપં નમામ્યહમ્ ॥ ૩૭॥

દ્વિભુજં મુરલીવક્ત્રં કિશોરં સસ્મિતં મુદા ।

શશ્વદ્ગોપાઙ્ગનાભિશ્ચ વીક્ષ્યમાણં નમામ્યહમ્ ॥ ૩૮॥

રાધયા દત્તતામ્બૂલં ભુક્તવન્તં મનોહરમ્ ।
રત્નસિંહાસનસ્થં ચ તમીશં પ્રણમામ્યહમ્ ॥ ૩૯॥

રત્નભૂષણભૂષાઢ્યં સેવિતં શ્વેતચામરૈઃ ।
પાર્ષદપ્રવરૈર્ગોપકુમારૈસ્તં નમામ્યહમ્ ॥ ૪૦॥

વૃન્દાવનાન્તરે રમ્યે રાસોલ્લાસસમુત્સુકમ્ ।
રાસમણ્ડલમધ્યસ્થં નમામિ રસિકેશ્વરમ્ ॥ ૪૧॥

શતશ‍ૃઙ્ગે મહાશૈલે ગોલોકે રત્નપર્વતે ।
વિરજાપુલિને રમ્યે પ્રણમામિ વિહારિણમ્ ॥ ૪૨॥

પરિપૂર્ણતમં શાન્તં રાધાકાન્તં મનોહરમ્ ।
સત્યં બ્રહ્મસ્વરૂપં ચ નિત્યં કૃષ્ણં નમામ્યહમ્ ॥ ૪૩॥

॥ ફલશ્રુતિઃ ॥

શ્રીકૃષ્ણસ્ય સ્તોત્રમિદં ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ।
ધર્માર્થકામમોક્ષાણાં સ દાતા ભારતે ભવેત્ ॥ ૪૪॥

હરિદાસ્યં હરૌ ભક્તિં લભેત્સ્તોત્રપ્રસાદતઃ ।
ઇહ લોકે જગત્પૂજ્યો વિષ્ણુતુલ્યો ભવેદ્ધ્રુવમ્ ॥ ૪૫॥

સર્વસિદ્ધેશ્વરઃ શાન્તોઽપ્યન્તે યાતિ હરેઃ પદમ્ ।
તેજસા યશસા ભાતિ યથા સૂર્યો મહીતલે ॥ ૪૬॥

જીવન્મુક્તઃ કૃષ્ણભક્તઃ સ ભવેન્નાત્ર સંશયઃ ।
અરોગી ગુણવાન્વિદ્વાન્પુત્રવાન્ધનવાન્સદા ॥ ૪૭॥

ષડભિજ્ઞો દશબલો મનોમાયી ભવેદ્ધ્રુવમ્ ।
સર્વજ્ઞઃ સર્વદશ્ચૈવ સ દાતા સર્વસમ્પદામ્ ॥ ૪૮॥

કલ્પવૃક્ષસમઃ શશ્વદ્ભવેત્કૃષ્ણપ્રસાદતઃ ।
ઇત્યેવં કથિતં સ્તોત્રં વત્સ ત્વં ગચ્છ પુષ્કરમ્ ॥ ૪૯॥

તત્ર કૃત્વા મન્ત્રસિદ્ધિં પશ્ચાત્પ્રાપ્સ્યસિ વાઞ્છિતમ્ ।
ત્રિસ્સપ્તકૃત્વો નિર્ભૂપાં કુરુ પૃથ્વીં યથાસુખમ્ ।
મમાઽઽશિષા મુનિશ્રેષ્ઠ શ્રીકૃષ્ણસ્ય પ્રસાદતઃ ॥ ૫૦॥

॥ ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે તૃતીયે ગણપતિખણ્ડે
નારદનારાયણસંવાદે સ્તવપ્રદાનં નામ
દ્વાત્રિંશતમોઽધ્યાયે શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ॥

NA

*Shri Krishna Stotra Shri Mahadevakrita*

pdf was typeset on April 4, 2020

Please send corrections to *sanskrit@cheerful.com*